CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

PAPER 1. Prescribed Texts

**MAY/ JUNE 2016**

Additional materials:
Answer paper

**TIME** 2 $^{1}/_{2}$ hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

**1** *Buddhacarita of Aśvaghoṣa*

**(i)** स्थूलोदरः श्वासचलच्छरीरः स्रस्तांसबाहुः कृशपाण्डुगात्रः ।
अम्बेति वाचं करुणं ब्रुवाणः परं समाश्रित्य नरः क एषः ॥

ततोऽब्रवीत्सारथिरस्य सौम्य धातुप्रकोपप्रभवः प्रवृद्धः ।
रोगाभिधानः सुमहाननर्थः शक्तोऽपि येनैष कृतोऽस्वतन्त्रः ॥

इत्यूचिवान् राजसुतः स भूयस्तं सानुकम्पो नरमीक्षमाणः ।
अस्यैव जातो पृथगेष दोषः सामान्यतो रोगभयं प्रजानाम् ॥

ततो बभाषे स रथप्रणेता कुमार साधारण एष दोषः ।
एवं हि रोगैः परिपीड्यमानो रुजातुरो हर्षमुपैति लोकः ॥

इति श्रुतार्थः स विषणचेताः प्रावेपताम्बूर्मिगतः शशीव ।
इदं च वाक्यं करुणायमानः प्रोवाच किंचिन्मृदुना स्वरेण ॥

इदं च रोगव्यसनं प्रजानां पश्यंश्च विश्रम्भमुपैति लोकः ।
विस्तीर्णमज्ञानमहो नराणां हसन्ति ये रोगभयैरमुक्ताः ॥

*Chap. 3, vv 41 to 46*

**(a)** Translate lines 3 and 4, *'tato'bravīt . . . kṛto'svatantraḥ'.* [4]

**(b)** Translate and identify the type of compound:
**(i)** *'sthūlodaraḥ'* (line 1)
**(ii)** *'rogavyasanam'* (line 11) [4]

**(c)** What is the event being described here? To whom is it happening? How did it come about? [2]

**(ii)** उपवासविधीन्नैकान् कुर्वन्नरदुराचरान् ।
वर्षाणि षट् शमप्रेप्सुरकरोत्कार्श्यमात्मनः ॥

अन्नकालेषु चैकैकैः स कोलतिलतण्डुलैः ।
अपारपारसंसारपारं प्रेप्सुरपारयत् ॥

देहादपचयस्तेन तपसा तस्य यः कृतः ।
स एवोपचयो भूयस्तेजसास्य कृतोऽभवत् ॥

कृशोऽप्यकृशकीर्तिश्रीर्ह्लादं चक्रेऽन्यचक्षुषाम् ।
कुमुदानामिव शरच्छुक्लपक्षादिचन्द्रमाः ॥

त्वगस्थिशेषो निःशेषैर्मेदःपिशितशोणितैः ।
क्षीणोऽप्यक्षीणगाम्भीर्यः समुद्र इव स व्यभात् ॥

अथ कष्टतपःस्पष्टव्यर्थक्लिष्टतनुर्मुनिः ।
भवभीरुरिमां चक्रे बुद्धिं बुद्धत्वकाङ्क्षया ॥

*Chap. 12, vv 95 to 100*

**(a)** Scan lines 3 and 4, *'annakāleṣu .... prepsurapārayat'.* [2]

**(b)** Translate lines 5 and 6, *'dehād apacayas .... kṛto'bhavat'.* [4]

**(c)** Translate and identify the type of compound:
**(i)** *'śamaprepsuḥ'* (line 2)
**(ii)** *'akṣīṇagāmbhīryaḥ'* (line 10) [4]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)** मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥

भगवन्सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ॥

यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत् ।
प्रापणात्सर्वकामानां परित्यागो विशिष्यते ॥

न तथैतानि शक्यन्ते संनियन्तुमसेवया ।
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥

वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥

*Chap. 1, vv 1 and 2; Chap. 2, vv 95 to 98*

**(a)** Translate lines 3 and 4, *'bhagavan . . . arhasi'.* [4]

**(b)** Translate and identify the type of compound:
**(i)** *'maharṣayaḥ'* (line 1)
**(ii)** *'jitendriyaḥ'* (line 12) [4]

**(c)** Give two facts about restraint and detachment from lines 5 to 12. [2]

**(ii)** धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।
न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥

एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥

मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥

तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥

*Chap. 4, vv 238 to 242*

**(a)** Translate lines 3 to 6, *‘nāmutra hi . . . duṣkṛtam’.* [4]

**(b)** Translate and identify the type of compound:
**(i)** *‘sarvabhūtāni’* (line 2)
**(ii)** *‘kāṣṭhaloṣṭhasamam’* (line 7) [4]

**(c)** What sense of *dharma* do these verses convey? What other senses of *dharma* have you met? [2]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

**(i)** अग्निर्यथैको भुवनं प्रविष्टो
   रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
   रूपं रूपं प्रतिरूपो बहिश्च॥

नित्योऽनित्यानां चेतनश्चेतनानाम्
   एको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीरास्
   तेषां शान्तिः शाश्वती नेतरेषाम्॥

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्।
कथं नु तद्विजानीयां किमु भाति विभाति वा॥

न तत्र सूर्यो भाति न चन्द्रतारकं
   नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
   तस्य भासा सर्वमिदं विभाति॥

*Kaṭha Up. 2:2: 9 and 13 to 15*

**(a)** Translate lines 1 to 4, *'agnir yathaiko . . . bahiś ca'.* [4]

**(b)** Translate and identify the type of compound:
**(i)** *'anityānām'* (line 5)
**(ii)** *'candratārakam'* (line 11) [4]

**(c)** Translate and explain the second question in line 10. [2]

**(ii)** कतम आत्मेति; योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः;
स समानः सन्नुभौ लोकावनुसंचरति, ध्यायतीव लेलायतीव;
स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि॥

सलिल एको द्रष्टाद्वैतो भवति, एष ब्रह्मलोकः सम्राडिति
हैनमनुशशास याज्ञवल्क्यः, एषास्य परमा गतिः, एषास्य परमा
संपत्, एषोऽस्य परमो लोकः, एषोऽस्य परम आनन्दः;
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति॥

स यो मनुष्याणां राद्धः समृद्धो भवति, अन्येषामधिपतिः
सर्वैर्मानुष्यकैर्भोगैः, सम्पन्नतमः, स मनुष्याणां परम आनन्दः॥

*Bṛhadāraṇyaka Up. 4:3: 7, 4:3 32* and *33*

**(a)** Translate lines 5 to 7, *'eṣāsya paramā . . . mātrām upajīvanti'.* [4]

**(b)** Translate and identify the type of compound:
**(i)** *'antarjyotiḥ'* (line 1)
**(ii)** *'brahmalokaḥ'* (line 4) [4]

**(c)** The last two lines speak of human bliss. This is the first step of a sequence. To whom do the further increments of bliss, which are mentioned following this passage, apply? [2]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥

दैवी संपद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव॥

*Chap. 7, vv 7 and 8; Chap. 16, vv 4 and 5*

**(a)** Translate lines 1 to 4, *'mattaḥ parataraṃ . . . pauruṣaṃ nṛṣu'.* [4]

**(b)** Translate and identify the type of compound or the grammatical formation:
**(i)** *'ajñānam'* (line 6)
**(ii)** *'pāṇḍava'* (line 8) [4]

**(c)** Lines 5 and 6 list the ungodly qualities. Previous verses from this chapter of the Bhagavad Gītā list the divine qualities. Name four of these in Sanskrit with their English translations. [2]

**(ii)** के गुणाः कथं बध्नन्तीत्युच्यते
सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥

सत्त्वमिति। सत्त्वं रजस्तम इत्येवंनामानो गुणा इति पारिभाषिकः शब्दो न रूपादिवत् द्रव्याश्रिताः गुणाः। न च गुणगुणिनोरन्यत्वमत्र विवक्षितम्। तस्मात् गुणा इव नित्यपरतंत्राः क्षेत्रज्ञं प्रति अविद्यात्मकत्वात्क्षेत्रज्ञं निबध्नन्तीव। तमास्पदीकृत्यात्मानं प्रतिलभन्ते इति निबध्नन्तीत्युच्यते। ते च प्रकृतिसंभवा भगवन्मायासंभवा निबध्नन्तीव हे महाबाहो महान्तौ समर्थतरौ आजानुप्रलंबौ बाहू यस्य स महाबाहुः हे महाबाहो देहे शरीरे देहिनं देहवन्तमव्ययं, अव्ययत्वं चोक्तं अनादित्वात् इत्यादिश्लोकेन। ननु देही न लिप्यते इत्युक्तं तत्कथमिह निबध्नन्ति इत्यन्यथोच्यते परिहृतमस्माभिः इवशब्देन निबध्नन्तीवेति॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā,* Chap. 14, v 5

**(a)** Translate lines 8 to 11, *'te ca . . . anāditvāt'.* [4]

**(b)** Translate and identify the type of compound:
**(i)** *'guṇaguṇinoḥ'* (line 5)
**(ii)** *'kṣetrajñam'* (line 7) [4]

**(c)** Give two examples from the text of how Śaṅkara explains the meaning of the verse on which he is commenting. [2]

[Total: 10 + 10 = 20 marks]

END